नं. ५०८७ ख.

शांखायनारण्यकम्.

× × × ×

पत्र. ६७ —— सं. ४

संहिता ब्राह्मणम्.

शाङ्खायनारण्यकम्

तेषुतेषुस्थानेषुप्रत्याजायतेयथा[...]मयथाविद्यंतमागतंपृ
च्छतिकोसीतितंप्रतिब्रूयाद्विचक्षणादृतवोरेतआभृतंपंचद
शात्प्रसूतात्पित्र्यावतस्तंमापुंसिकर्तर्येरयध्वंपुंसाकर्त्रामिमा
रिमानिषिंचसजायमानोद्वादशत्रयोदशउपमासोद्वादशत्रयो
दशेनपित्रासंतद्विदेप्रतितद्विदेहंतन्मऋतवोमर्त्यवआ
रभध्वंतेनसत्येनतेनतपसाऋतुरस्म्यार्तवोस्मिकोसित्वमस्मी
तितमतिसृजते[...]सएतंदेवयानंपंथानमापद्याग्निलोकमा

आरण्यक प्रश्नो

२

गच्छतिसवायुलोकंसवरुणलोकंसइंद्रलोकंसप्रजापतिलोकं
सब्रह्मलोकंतस्यवाएतस्यब्रह्मलोकस्यारोह्रदोमुहूर्त्तायेष्टिहा
विरजानदील्योवृक्षःसालज्यंसंस्थानमपराजितमायतनमिं
द्रप्रजापतीद्वारगोपौविभुप्रमितंविचक्षणासंध्यमितोजाःप
र्यंकःप्रियाचमानसीप्रतिरूपाचचाक्षुषीपुष्पाण्यादायावयतौ
वैजगान्यंबाश्चांबायवीश्चाप्सरसोंबयानयस्तमित्थंविदाग
च्छतितंब्रह्माहाभिधावतममयशसाविवाअयंनदींप्रापन्न २

बार

वाप्ययंजरयिष्यतीति।तंपंचशतान्यप्सरसांप्रतियंतिशतं
फलहस्ताःशतमांजनहस्ताःशतंमाल्यहस्ताःशतंवासोहस्ताःश
तंचूर्णहस्तास्तंब्रह्मालंकारेणालंकुर्वंतिसब्रह्मालंकारेणा
लंकृतोब्रह्मविद्वान्ब्रह्माभिप्रैतिसआगच्छत्यारंह्रदंतंमनसा
त्येतितमित्वासंप्रतिविदोमज्जंतिसआगच्छतिमुहूर्तान्येष्टि
हांस्तेस्मादपद्रवंतिसआगच्छतिविजरांनदींतांमनसैवात्ये
तितत्सुकृतदुष्कृतेविधुन्वातेतस्यप्रियाज्ञातयःसुकृतमुपयं

त्यप्रियादुष्कृतंतद्यथारथेनधावयन्रथचक्रेपर्यवेक्षेतैवमहो
रात्रेपर्यवेक्षेतैवंसुकृतदुष्कृतेसर्वाणिचद्वंद्वानिसएषविसु
कृतोविदुष्कृतोब्रह्मविद्वान्ब्रह्मैवाभिप्रैति॥ सआगच्छतील्यं
वृक्षंतंब्रह्मगंधःप्रविशतिसआगच्छतिसालज्यंसंस्थानंतंब्रह्म
रसःप्रविशतिसआगच्छत्यपराजितमायतनंतंब्रह्मयशःप्रवि
शतिसआगच्छतींद्रप्रजापतीद्वारगोपौतावस्मादपद्रवतस
आगच्छतिविभुप्रमितंतंब्रह्मतेजःप्रविशतिसआगच्छतिवि

यच्चर्णामासंदीबृहद्रथंतरेसामनीपूर्वैपादौश्यैतनौधसे
यापरौवैरूपावैराजेन्नूच्येशाक्वररैवतेतिरश्चीसाप्रज्ञा
प्रकृयाहिविपश्यतिसन्नागछत्यमितौजसंपर्यंकंसप्राणा
स्तस्यन्नुर्तंयन्नविष्यद्यपुवैपादौ ऋच्येरायापरौनद्दूय!
ज्ञायज्ञियेशीर्षण्येबृहद्रथंतरेन्नूच्यारूयश्चसामनीयप्रा:
यीनातानियजूंषितिरश्चीनानिसोमांशवउपस्तरणमुऊी
थोपरस्थयय:श्रीरूपबर्हणंतस्मिन्नब्रह्मास्तेतमिच्छंवित्पादे

नैवाग्नेःप्राणोराहतितंब्रह्मापृछतिकोसीतितंप्रतिब्रूयात्॥५॥
ऋतुरस्म्यार्तवोस्म्याकाशाद्योनेःसंभूतोभार्यायैरेतःसंव
सरस्यतेजोभूतस्यभूतस्यात्माभूतस्यभूतस्यत्वमात्मासि
यस्त्वमसिसोहमस्मितमाहकोहमस्मीतिसत्यमितिब्रू
२त याकिंतद्यत्सत्यमितियदन्यद्देवेभ्यश्चप्राणेभ्यश्चतत्सदथय
द्देवाश्चप्राणाश्चतत्त्यंतदेकयावाचाभिव्याह्रियतेसत्यमि
त्येतावदिदंसर्वमिदंसर्वमस्मीत्येवैनंतदाहतदेतश्लोके।

नाच्युते ॥९॥ यजूदरः सामशिरा ह्यसावमूर्त्तिरव्ययः स ब्र
ह्मेति विज्ञेय ऋषिर्ब्रह्ममयो महानिति तमाह केन मे पौंस्नानि
नामान्याप्नोषीति प्राणेनेति ब्रूयात्केन नपुंसकानीति मनसे
ति केन स्त्रीनामानीति वाचेति केन गंधानिति घ्राणेनेति के
न रूपाणीति चक्षुषेति केन शब्दानिति श्रोत्रेणेति केनान्नर
सानिति जिह्वयेति केन कर्माणीति हस्ताभ्यामिति केन सु
खदुःखरति शरीरेणेति केनानंदं रतिं प्रजातिमित्युपस्थेने

हा॰पे

तिकेनेत्याइतिपादाभ्यामितिकेनधियोविज्ञातव्यंकामानि
तिप्रज्ञयैवेतिब्रूयात्तमाँवैखलुमेलोकायंतेसावितिसाया
ब्रह्मणोजितिर्याव्यष्टिस्तांजितिंजयतितांव्यष्टिंव्यश्नुतेयएवंवे
दयएवंवेद॥७॥इतितृतीयोध्यायःसमाप्तः॥७॥प्राणोब्रह्मेतिह
स्माहकौषीतकिस्तस्यवाएतस्यप्राणस्यब्रह्मणोमनोदूतंच
क्षुर्गोप्तृश्रोत्रंसंश्रावयितृवाक्परिवेष्ट्रीसयोहवाएतस्यप्रा
णस्यब्रह्मणोमनोदूतंवेददूतवान्भवतियश्चक्षुर्गोप्तृगोप्तृमा ५

भवतियःश्रोत्रंसंश्रावयितृसंश्रावयितृमाभवतियोवायुंप
रिवेष्टृपरिवेष्टृमाभवतितस्मैवाएतस्मैप्राणायब्रह्मणए
तादेवताअयाचमानायबलिंहरंत्येवंहैवास्मैसर्वाणिभू
तान्ययाचमानायैवबलिंहरंतियएवंवेदतस्योपनिषन्न
याचेदितितद्यथाग्रामंभिक्षित्वालब्ध्वोपविशेन्नाहमतोदत्त
मश्नीयामितितएवैनमुपमंत्रयंतेयेपुरस्तात्प्रत्याचक्षीरन्नेष
धर्मोयाचितोभवत्यन्नदास्त्वेवैनमुपमंत्रयंतेददामतइति॥१॥

प्राणो ब्रह्मेति ह स्माह पैंग्यस्तस्य वा एतस्य प्राणस्य ब्रह्मणो
वाक्पुरस्ताच्चक्षुरारुंधते चक्षुः पुरस्ताछ्रोत्रमारुंधते श्रोत्रं पुरस्ता
न्मनस्त्वारुंधते मनः पुरस्तात्प्राणस्त्वारुंधते तस्मै वा एतस्मै प्राणा
य ब्रह्मण एता देवता अयाचमानाय बलिं हरंत्येवं हैवास्मै स
र्वाणि भूतान्ययाचमानायैव बलिं हरंति य एवं वेद तस्योपनि
षन्न याचेदिति तद्यथा ग्रामं भिक्षित्वालब्ध्वोपविशेन्नाहमतो द
त्तमश्नीयामिति त एवैनमुपमंत्रयंते ये पुरस्तात्प्रत्याचक्षीर ६

न्नेषधर्मीयाचितोन्नवन्तान्नदाःस्वेवैनमुपमंत्रयंतेहद्दामतो
ति॥रात्रथातएकधनावैराधनंयएकधनमभिनिध्यायात्पौर्ण
मास्यांवामावास्यायांवापुष्यपक्षेवापुण्येनक्षत्रएतेषामेक
स्मिन्नग्निमुपसमाधायपरिसमुह्यपरिस्तीर्यपर्युक्ष्य
दक्षिणंजान्वाच्यस्रुवेणाज्याहुतीर्जुहोतिवाङ्नामदेवतावैरा
धनीसामेमुष्मादिदमवरुन्ध्यात्तस्यैस्वाहाप्राणोनामदे
वतावैराधनीसामेमुष्मादिदमवरुन्ध्यात्तस्मैस्वाहायकु

नमिदेवतावरेधनीसामेमुष्मादिदमवरुंध्यात्तस्यैस्वाहा
श्रोत्रंनामदेवतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्यैस्वा
हामनोनामदेवतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्यै
स्वाहाप्रज्ञानामदेवतावरोधनीसामेमुष्मादिदमवरुंध्या
त्तस्यैस्वाहेत्यथधूमंजोधंत्रजिघ्रायाज्यलेपेनांगान्यनुवि
मृज्यवाचंयमोऽभिप्रव्रज्यार्थंब्रूयाद्दूतंवाप्रहिणुयादुक्ते
हैवंसा आत्तथातोदैवस्मरोयस्यप्रियोबुभूषेयस्यैवायेभ्यं ७

ऋा

वायासीद्वैतेषामेविकस्मिन्यवर्ण्येतयैवावृतैताज्याहुती
र्जुहोतिवांयंतेमयिजुहोम्यसौस्वाहाप्राणंतेमयिजुहोम्य
सौस्वाहाचक्षुस्तेमयिजुहोम्यसौस्वाहाश्रोत्रंतेमयिजुहो
म्यसौस्वाहामनस्तेमयिजुहोम्यसौस्वाहाप्रज्ञांतेमयि
जुहोम्यसौस्वाहेत्यथधूमगंधंप्रजिघ्रायाज्यलेपेनांगान्य
नुविमृज्यवाचंयमोऽभिप्रव्रज्यसंस्पर्शंजिगमिषेदपिवा
ताद्वातिष्ठेसंभाषमाणःप्रियोहैवभवतिस्मरंतेहैवमस्य।।

अथातः संयमनं प्रातर्दनमांतरमग्निहोत्रमित्याचक्षते या
वद्वै पुरुषो भाषते न तावत्प्राणितुं शक्नोति प्राणं तदा वाचि जु
होति यावद्वै पुरुषः प्राणिति न तावद्भाषितुं शक्नोति वाचं
तदा प्राणे जुहोत्येतेऽनंतेऽमृते आहुती जाग्रच्च स्वपं
6 श्च संततं जुहोत्यथ या अन्या आहुतयोंतवत्यस्ताः क
र्ममय्यो हि भवंति तद्ध स्मैतत्पूर्वे विद्वांसोऽग्निहोत्रं न जुह ८
वांचक्रुः ।।५।। उक्थं ब्रह्मेति स्माह शुष्कभृंगारस्तदृगित्यु

पासीतसर्वाणिहास्मैभूतानिश्रैष्ठ्यायार्च्यंतेतद्यजुषि
ण्युपासीतसर्वाणिहास्मैभूतानिश्रैष्ठ्याययुज्यंतेतत्साम
न्युपासीतसर्वाणिहास्मैभूतानिश्रैष्ठ्यायसंनमंतेतच्छ्रीरि
त्युपासीततद्यशइत्युपासीतेतेनयथैतच्छ्रीमत्तमंयशस्वितमं
तेजस्वितममितिशास्त्रेषुभवत्येवंहैवससर्वेषुभूतेषुश्रीम
त्तमोयशस्वितमस्तेजस्वितमोभवतियएवंवेदतद्वैतादृ
ष्टिकंकर्ममयमात्मानमध्वर्युःसंस्करोतितस्मिन्यजुर्मयंप्र

तेजइत्युपासीत ४

यतियजुर्मयंसअयंहोतरुअयेसाममयमुक्थातास्यै
षत्रय्यैविद्यायाआत्मैषउएवैतदिंद्रस्यात्माभवतियएवं
वेद॥ ५॥ अथातःसर्वजितःकौषीतकेस्त्रीण्युपासनानिभ
वंतिसर्वजिद्धस्मकौषीतकिरुद्यंतमादित्यमुपतिष्ठतेयज्ञो
पवीतंकृत्वोदकमानीयत्रिःप्रसिच्योदपात्रंवर्गोसिपाप्मा
नंमेवृङ्धीत्येतयैवावृतामध्येसंततमुद्वर्गोसिपाप्मानंमउ ८
द्वृङ्धीत्येतयैवावृतास्तंयंतंसंवर्गोसिपाप्मानंमेसंवृङ्धी

त्तितयदहोरात्राभ्यांपापमकरोत्संतद्दह्ने तयोएवैवंविद्वाने
तयैवावृत्तादित्यमुपतिष्ठतेयदह्नोरात्राभ्यांपापंकरोतिसंतद्द
ह्नो ॥७॥ अथमासिमास्यमावास्यायांवृत्तायांपश्चाच्चंद्रमसंदृ
श्यमानमुपतिष्ठेततयैवावृताहरितरणोवाप्रच्यस्यन्मेसुस
मिद्धृदयंदिविचंद्रमसिश्रितंमन्येहंमांतद्विद्वांसंमाहंपुत्र्य
६ मघंरुदमितियस्मात्पूर्वाः प्रजाः प्रैतीतिजातपुत्रस्याथाज
तपुत्रस्याप्यायस्वसमेतुतेसंतेपयांसिसमुयंतुवाजायमा

दित्यान्नंश्रुमाथायायंतीत्येतामृस्वरूयोजपित्वामास्मा
कंप्राणेनप्रजयापशुन्निराथायायिष्ठायोस्मान्द्वेष्टियंचवयं
द्विष्मस्तस्यप्राणेनप्रजयापशुन्निराथायायस्वेत्यैंद्रीमावृत
मावर्तन्नपादित्यस्यावृतमन्वावर्तइतिदक्षिणंबाहुमन्वावर्त
ते॥८॥न्नथापोर्णमास्यांपुरस्ताच्छंद्रमसंदृश्यमानमुपति
ष्ठेतैतयैवावृतासोमोराजासिविचक्षणःपंचमुखोसिप्रजा १०
पतिर्ब्राह्मणस्तएकंमुखंतेनमुखेनराज्ञोत्सितेनमुखेनमा

मन्नादं कुरु राजा त एकं मुखं तेन मुखेन विशोऽत्सि तेन मुखेन
मामन्नादं कुरु श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽत्सि तेन
मुखेन मामन्नादं कुरु वह्निष्ट एकं मुखं तेन मुखेनेमं लोकम
त्सि तेन मुखेन मामन्नादं कुरु त्वयि पंचमं मुखं तेन मुखेन स
र्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु मास्माकं प्राणे
न प्रजया पशुभिरपक्षेष्ठा यो स्मान्द्वेष्टि यं च वयं द्विष्मस्त
स्य प्राणेन प्रजया पशुभिरपक्षीयस्वेति देवी मावृत्तमावर्त

त्रपादित्यस्यावृतमन्वावर्त्त इति दक्षिणं बाहुमन्वावर्त्तते ॥९॥
अथ संवेशय जायायै हृदयमभिमृशेत् यत्ते सुशीमे हृदयं श्रित
मन्तः प्रजापतौ। तेनामृतत्वस्येशाने मा त्वं पुत्र्यमघं निगा इति
नस्यास्या सूर्वाः प्रजाः प्रेतीति ॥१०॥ अथ प्रोष्यायन्पुत्रस्य मूर्ध
नमभिजिघ्रेदङ्गादङ्गात्संभवसि हृदयाः प्रेती दधिजाय
सो आत्मा वै पुत्र नामासि स जीव शरदः शतमिति नामास्य ११
दधात्यश्मा भव परशुर्भव हिरण्यमस्तुतं भव वेदो वै पुत्र नाम

प्रजा
तीयन प्रजापतिः पर्यगृह्णात्त्वं दरिष्टं तेन त्वा परिगृह्णा १

मिम्स जीव शरदः शत मिति नामास्य गृह्णात्यथैनस्य परिगृह्णा
न्यसावित्यथास्य दक्षिणे कर्णे जपत्यस्मे प्रयंधि मघवन्नृजी
षिन्निती ३ श्रेष्ठानि द्रविणानि धेहीति सव्ये मा छेत्था मा व्य
थिष्ठाः शतं शरद आयुषो जीव स्व पुत्र तेनाम्नामूर्ध्ननमभिजि
जिघ्रामीति त्रिरस्य मूर्धानमभिजिघ्रेऽवं त्वा हिंकारेणा
भिहिंकरामीति त्रिरस्य मुर्धानमभिहिंकुर्यात ॥११॥ नक्षत्रथा
तादेवः परिमरए तात्वं ब्रह्मदीपातयदक्षिणे ज्वलव्यथैतन्नि

यतेयन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राणाए

ताद्वै ब्रह्म प्रदीप्यते यदादित्यो दृश्यते थैतन्म्रियते यन्न दृश्य

ते तस्य चंद्रमसमेव तेजो गच्छति वायुं प्राणा एतद्वै ब्रह्म दी

प्यते यच्चंद्रमा दृश्यते थैतन्म्रियते यन्न दृश्यते तस्य विद्यु

तमेव तेजो गच्छति वायुं प्राणाए तद्वै ब्रह्म दीप्यते यद्विद्यु

द्योततेऽथैतन्म्रियते यन्न विद्योतते तस्या दिश एव तेजो ग

च्छति वायुं प्राणास्ता वा एताः सर्वा देवता वायुमेव प्रविश्य १२

वायौम्रत्वांतम्रृच्छेतेतस्मादेवपुनरुदीरतइत्यधिदेवतमथाध्या
त्मं॥१२॥एताद्वैब्रह्मदीप्यतेयद्वाचावदत्यथैतन्म्रियतेयन्नव
दतितस्यचक्षुरेवतेजोगच्छतिप्राणंप्राणएताद्वैब्रह्मदीप्यते
यच्चक्षुषापश्यत्यथैतन्म्रियतेयन्नपश्यतितस्यश्रोत्रमेवते
जोगच्छतिप्राणंप्राणएतद्वैब्रह्मदीप्यतेयच्छ्रोत्रेणशृणोत्यथ
थैतन्म्रियतेनशृणोतितस्यमनएवतेजोगच्छतिप्राणंप्राण
एताद्वैब्रह्मदीप्यतेयन्मनसाध्यायत्यथैतन्म्रियतेयन्नध्या

ये

यतित स्यप्राणमेवतेजोऽभ्यतिप्राणं प्राणस्त्वाँ[वा] एताः सर्वादेव

ताः प्राणमेव प्रविश्य प्राणोमृत्वान्नमृच्छेते तस्मादेव पुनरुदीर

दां तेतद्यदिहवा एवं विद्वांसमुन्नेपर्वं तावनि प्रवर्त्तेयात तं द्रहिणश्चे

त्तरश्चतुस्तूर्षमाणौ नहैनं स्त एवं व्यानामथयएनं द्विषंतियां

श्च स्वयं द्वेष्टि तएवैनं परिम्रियंते॥१३॥ अथातो निःश्रेयसादा

13 नमेताहवैदेवता अहं श्रेयसे विवदमाना अस्माच्छरीरादुच्च १३

क्रमुस्तच्चापपात तच्छुष्कं दारुभूतं शिश्येऽथैनद्वाक्प्रविवेशत

न

घ्रायावदद्धिश्य एवाथैतच्चक्षुः प्रविवेश तद्घायावदचक्षुषा
पश्यच्छिश्य एवाथैतच्छ्रोत्रं प्रविवेश तद्घायावदचक्षुषापश्यच्छ्रो
त्रेणाशृण्वच्छिश्य एवाथैतन्मनः प्रविवेश तद्घायावदचक्षुषाप
श्यच्छ्रोत्रेणाशृण्वन्मनसाध्यायच्छिश्य एवाथैतत्प्राणः प्रविवेश तत्त
त एव समुत्तस्थौ ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा
प्राण एव प्रज्ञात्मानमभिसंभूय सहैवैतैः सर्वैरस्माच्छरीरादुच्च
क्रमुस्ते वायुः प्रविष्टा आकाशात्मानः स्वरीयुस्तथा एवैवंविद

न्प्राणेन निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंस्तुय
साहैवैतैः सार्वैरस्माच्छरीरादुत्क्रामति स वायुप्रतिष्ठ आका
शात्मा स्वरेति स तद्गच्छति यत्रैते देवास्तत्प्राप्य यदमृता देवा
स्तदमृतो भवति य एवं वेद ॥१४॥ अथातः पितापुत्रीयं संप्र
दानमिति याचक्षते पिता पुत्रं प्रेष्यन्नाह्वयति नवैस्तृणैरगा
15 रं संस्तीर्याग्निमुपसमाधायोदकुंभं सपात्रमुपनिधाया १८
हतेन वाससा संप्रच्छन्नः पिता शेत एत्य पुत्र उपरिष्टादभिनि

प यतरंद्रियैरिंद्रियाणि संस्पृश्यापि वास्माआसीनायाभिमु
खायैवसंप्रदध्यादथास्मैसंप्रयच्छतिवाचंमेत्वयिदधानी
तिपितावाचंतेमयिदधइतिपुत्रःप्राणंमेत्वयिदधानीतिपिता
प्राणंतेमयिदधइतिपुत्रश्चक्षुर्मेत्वयिदधानीतिपिताचक्षुस्ते
मयिदधइतिपुत्रःश्रोत्रंमेत्वयिदधानीतिपिताश्रोत्रंतेमयिदध
इतिपुत्रोऽन्नरसान्मेत्वयिदधानीतिपितान्नरसांस्तेमयिद
धइतिपुत्रःकर्माणिमेत्वयिदधानीतिपिताकर्माणिस्त्वयि

तेम

दधइतिपुत्रःसुखदुःखेमेत्वयिदधानीतिपितासुखदुःखेते
मयिदधइतिपुत्रआनंदंरतिंप्रजातिंमेत्वयिदधानीतिपिता
नंदंरतिंप्रजातिंतेमयिदधाइतिपुत्रइत्यान्मेत्वयिदधानीति
पितेत्यांतेमयिदधइतिपुत्रोमनोमेत्वयिदधानीतिपितामन
स्तेमयिदधइतिपुत्रःप्रज्ञांमेत्वयिदधानीतिपिताप्रज्ञांतेमयि
दधइतिपुत्रोयद्युवाउपानिगदःस्यात्समासेनैवब्रूयात्प्राणा १५
न्मेत्वयिदधानीतिपिताप्राणांस्तेमयिदधइतिपुत्रोथदक्षिणाव

उपनिष्क्रामन्तितंपितानुमंत्रयतेयशोब्रह्मवर्च्चसंकीर्तिस्ते
स्त्वाजुषतामित्यथेतरःसव्यमन्वंचंसमन्न्यवेहृतपाणिपेना
नांतर्द्धियवसनांतेनवाप्रच्छाद्यस्वर्गांल्लोकान्कामाना
प्नुहीतिसयद्यगदःस्यात्पुत्रस्यैश्वर्येपितावसेत्परिवाव्र
जेद्यद्युवैप्रेयात्तथैवैनंसमापयेयुर्यथासमापयितव्योभ
वतियथासमापयितव्योभवति॥१५॥ख्यारण्यकेचतुर्थो
ध्यायः॥ ॥क॥ ॥ॐ॥ प्रतर्द्दनोहवैदैवोदासिरिंद्रस्यप्रियं

ामोपजगामयुद्धेनचपौरुषेणचतंहेंद्रउवाचप्रतर्दनवरंवृ

णीष्वेतिसहोवाचप्रतर्दनस्त्वमेववृणीष्वयंत्वंमनुष्यायहित

तमंमन्यसइतितंहेंद्रउवाचनावैवरोवरस्मैवृणीतेत्वमेववृणी

ष्वेत्यथवरोवैकिलमेतिहोवाचप्रतर्दनोऽथोखल्विंद्रःस

त्यादेवनेयायसत्यंहींद्रस्तंहेंद्रउवाचमामेवविजानीह्येता

न्देवाहंमनुष्यायहिततमंमन्येयोमांविजानीयात्त्रिशीर्षा ११

16 णंत्वाष्ट्रमहनदरुन्मुखान्यतीन्सालावृकेभ्यःप्रायच्छंबहु

कौ.

संधाअतिक्रम्यदिविप्रह्लादीयानतृणामहमंतरिक्षेपौलोमान्पृ
थिव्यांकालखंजांस्तस्यमेतत्रनलोमचनामीयतसयोमांवेद
नहवैतस्यकेनचनकर्मणालोकोमीयतेनस्तेयेननभ्रूणहत्
ययानमातृवधेननपितृवधेननास्यपापंचकृषोमुखान्नी
लंवेतीति॥१॥सहोवाचप्राणोस्मिप्रज्ञात्मातंमामायुरमृत
मित्युपास्स्वायुःप्राणःप्राणोवाआयुर्यावदस्मिञ्छरीरेप्राणो
वसतितावदायुःप्राणेनह्येवास्मिंल्लोकेमृतत्वमाप्नोतिप्रज्ञ

17

यासत्वंसंकल्प्यंसयोमामायुरमृतमित्युपास्तेसर्वमायुरस्मिंल्लो
कएत्याप्नोत्यमृतत्वमक्षितिंस्वर्गेलोकेतद्धैकआहुरेकभूयंवैप्रा
णागच्छंतीतिनहिकश्चनशक्नुयात्सकृद्वाचानामप्रज्ञापयितुंच
क्षुषारूपंश्रोत्रेणशब्दंमनसाध्यातमेकभूयंवैप्राणाभूत्वैकैकमे
तानिसर्वाणिप्रज्ञापयंतीतिवाचंवदंतींसर्वेप्राणावाचमनुवदंतिच
क्षुःपश्यत्सर्वेप्राणाश्चक्षुरनुपश्यंतिश्रोत्रंशृण्वंतंसर्वेप्राणाःश्रोत्रमनुशृ १७
ण्वंतिमनोध्यायत्सर्वेप्राणामनोनुध्यायंतिप्राणंप्राणंतंसर्वेप्रा

णान्क्षनुप्राणां त्येवमुहैतदिति तं हैंद्र उवाचास्तित्वेव प्राणानां
निःश्रेयसमिति ॥२॥ जीवति वागपेतो मूकान्हि पश्यामो जी
वति चक्षुरपेतोंधान्हि पश्यामो जीवति श्रोत्रापेतो बधिरान्हि
पश्यामो जीवति मनोपेतो बालान्हि पश्यामो जीवति बाहुछि
न्नो जीवत्यूरुच्छिन्न इत्येवं हि पश्याम इत्यथ खलु प्राण एव प्र
ज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासी
तेति सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्रा

णस्तस्यैषैव दृष्टिरेतद्विज्ञानं यात्रैतत्पुरुषः सुप्तः स्वप्नं न कं
च न पश्यत्यथास्मिन्प्राण एवैकधा तदेनं वाक्सर्वैर्नामभिः
सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्ये
ति मनः सर्वैर्ध्यातैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्व
लतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्म
नः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोकाः
स एष प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्माद् १८

तैंदेवोऽहमुपासीतेतिसैषाप्राणोसर्वाप्तिर्योवैप्राणंःसाप्र
ज्ञायावाप्रज्ञाःसप्राणस्तस्यैषैवसिद्धिरेतद्विज्ञानंयत्रैतत्पु
रुषआर्त्तोमरिष्यन्नाबल्यमेत्यसंमोहमेतितमाहुरुदक्रमी
च्चित्तंनशृणोतिनपश्यतिनवाचावदतिनध्यायत्यथास्मि॥
न्प्राणएवैकधाभवतितदेनंवाक्सर्वैर्नामभिःसहाप्येतिच
क्षुःसर्वैरूपैःसहाप्येतिश्रोत्रंसर्वैःशब्दैःसहाप्येतिमनःसर्वै
र्ध्यातैःसहाप्येतिसयदास्माच्छरीरादुत्क्रामतिसहैवैतैःस॥

19 त्वैरुत्क्रामति॥५॥वागेवास्मिंसर्वाणिनामान्यभिविसृज्यं
तेवाचासर्वाणिनामान्याप्नोतिप्राणएवास्मिन्सर्वेगंधाअ
भिविसृज्यंतेप्राणेनसर्वान्गंधानाप्नोतिचक्षुरेवास्मिंसर्वा
णिरूपाण्यभिविसृज्यंतेचक्षुषासर्वाणिरूपाण्याप्नोति
श्रोत्रमेवास्मिंसर्वेशब्दाअभिविसृज्यंतेश्रोत्रेणसर्वान्शब्दा
नाप्नोतिमनएवास्मिंसर्वाणिध्यातान्यभिविसृज्यंतेमन १८
सासर्वाणिध्यातान्याप्नोतिसहह्येतावस्मिंछरीरेवसतः

स होत्क्रमतोऽथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवंति तद्व्या
ख्यास्यामः ॥४॥ वागेवास्या एकमंगमुदूळ्हं तस्यै नाम परस्ता
त्प्रतिविहिता भूतमात्रा प्राण एवास्या एकमंगमुदूळ्हं तस्य गंधः
परस्तात्प्रतिविहिता भूतमात्रा चक्षुरेवास्या एकमंगमुदूळ्हं त
स्य रूपं परस्तात्प्रतिविहिता भूतमात्रा श्रोत्रमेवास्या एकमंग
मुदूळ्हं तस्य शब्दः परस्तात्प्रतिविहिता भूतमात्रा जिह्वैवास्या
एकमंगमुदूळ्हं तस्या अन्नरसः परस्तात्प्रतिविहिता भूतमात्रा

हस्तावेवास्या एकमंगमुद्दूळ्हं तयोः कर्म परस्तात्प्रतिविहिताभ्भूतमात्रा शरीरमेवास्या एकमंगमुदूळ्हं तस्य सुखदुःखे परस्तात्प्रतिविहिताभ्भूतमात्रोपस्थ एवास्या एकमंगमुदूळ्हं तस्यानंद रतिः प्रजापतिः परस्तात्प्रतिविहिताभ्भूतमात्रा पादावेवास्या एकमंगमुदूळ्हं तयोरित्या परस्तात्प्रतिविहिताभ्भूतमात्रा मन एवास्या एकमंगमुदूळ्हं तस्य धीः कामाः परस्तात्प्रतिविहिता भ्भूतमात्रा ॥ ५ ॥ प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्या ४०

प्नोति प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान्गंधानाप्नोति प्रज्ञ
या चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति प्रज्ञया श्रो
त्रं समारुह्य श्रोत्रेण सर्वांछब्दानाप्नोति प्रज्ञया जिह्वां समा
रुह्य जिह्वया सर्वानन्नरसानाप्नोति प्रज्ञया हस्तौ समारुह्य
हस्ताभ्यां सर्वाणि कर्माण्याप्नोति प्रज्ञया शरीरं समारुह्य
शरीरेण सुखदुःखेन्पाप्नोति प्रज्ञयोपस्थं समारुह्योपस्थेनानं
दं रतिं प्रजातिमाप्नोति प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा

द्व्यान्याप्नोति प्रज्ञया मनः समारुह्य मनसा सर्वाणि ध्याता
न्याप्नोति ॥६॥ नहि प्रज्ञापेता वाङ्नाम किंचन प्रज्ञापयेदन्यत्र
मे मनोऽभूदित्याह नाहमेतं नाम प्रज्ञासिषमिति नहि प्रज्ञापे
तः प्राणो गंधं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाह
मेतं गंधं प्राज्ञासिषमिति नहि प्रज्ञापेतं चक्षू रूपं किंचन प्रज्ञा
पयेदन्यत्र मे मनोऽभूदित्याह नाहमेतद्रूपं प्राज्ञासिषमिति २१
नहि प्रज्ञापेतं श्रोत्रं शब्दं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदि

त्याहनाहमेतंशब्दंप्राज्ञासिषमितिनहिप्रज्ञापेताजिह्वान्नरसं
कंचनप्रज्ञापयेदन्यत्रमेमनोऽभूदित्याहनाहमेतमन्नरसंप्राज्ञा
सिषमितिनहिप्रज्ञापेतौहस्तौकर्मकिंचनप्रज्ञापयेयातामन्य
त्रनोमनोऽभूदित्याहतुर्नावामेतत्कर्मप्राज्ञासिष्वेतिनहिप्रज्ञापे
तंशरीरंनसुखंनदुःखंकिंचनप्रज्ञापयेदन्यत्रमेमनोऽभूदित्या
हनाहमेतत्सुखंनदुःखंप्राज्ञासिषमितिनहिप्रज्ञापेतउपस्थ
आनंदंनरतिंनप्रजातिंकांचनप्रज्ञापयेदन्यत्रमेमनोऽभूदित्या

हृन्नाहमेत मानंदं न रतिं न प्रजातिं प्राज्ञासिषमिति न हि प्रज्ञापे
तापादावित्यां कांचन प्रज्ञापयेयात्यन्यत्र मे मनोऽभूदित्याहनु
न्नाहमेतामित्यां प्राज्ञासिषमिति न हि प्रज्ञापेता धीः काचन सिध्ये
न्न प्रज्ञातव्यं प्रज्ञायेत ॥९॥ न वाचं विजिज्ञासीत वक्तारं विद्यान्न
गंधं विजिज्ञासीत घ्रातारं विद्यान्न रूपं विजिज्ञासीत द्रष्टारं वि
या द्यान्न शब्दं विजिज्ञासीत श्रोतारं विद्यान्नान्नरसं विजिज्ञासीता २२
न्नरसस्य विज्ञातारं विद्यान्न कर्म विजिज्ञासीत कर्तारं विद्यान्न

सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यादानंदं न
रतिं न प्रजातिं विजिज्ञासीतानंदस्य रतेः प्रजातेर्विज्ञातारं वि
द्यान्नेत्यां विजिज्ञासीतैतारं विद्यान्मनो विजिज्ञासीत मंतारं विद्या
त्ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि
भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमा ६।३
त्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्या
रेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामा

त्रास्य पिता· आकाशो माता· प्राणोपिता· स एष प्राण एव प्रज्ञात्मानंदो
ऽजरोमृतो न साधुना कर्म्मणा भूयान्भवति नो एवासाधुना कनी
यान् एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष
का॰ तं॰ उ एवासाधु कर्म कारयति तं यमधो निनीषत एष लोकपाल एष लोका
धिपतिरेष लोकेशः स म आत्मेति विद्यात्स म आत्मेति विद्यात् ॥ इ
इ कौषीतक्यारण्यके पंचमोध्यायः ॥ ॥ अथ ह वै गार्ग्यो बालाकिरनूचा २३
नः संस्पृष्ट आस सोवसदुशीनरेषु स वसन्मत्स्येषु कुरुपंचाले

षुकाशिविदेहेष्वितिसहाजातशत्रुंकाश्यमाव्रज्योवाच ब्रह्मते
ब्रवाणीतितंहोवाचाजातशत्रुःसहस्रंदद्मतइत्येतस्यांवा
चिजनकोजनकइतिवाउजनाधावंतीति॥१॥आदित्येबृहच्चं
द्रमस्यन्नंविद्युतिसत्यंस्तनयित्नौशब्दोवायाविंद्रोवैकुंठआ
काशेपूर्णमग्नौविषासहिरित्यप्सुतेजइत्यधिदैवतमथाध्यात्म
मादर्शेप्रतिरूपश्छायायांद्वितीयःप्रतिश्रुत्कायामसुरितिश
ब्देमृत्युःस्वप्नेयमःशरीरेप्रजापतिर्दक्षिणेक्षिणिवाचःसव्येक्षि

णि सत्यस्य ॥२॥ स होवाच बालाकिर्य एवैष आदित्ये पुरुषस्त
मेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयि
ष्ठा बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्द्धेति वाहमे
तमुपास इति स यो हैतमेवमुपास्ते तिष्ठाः सर्वेषां भूतानां मूर्द्धा
भवति ॥३॥ स होवाच बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमेवा
हमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा अ २४
न्नस्यात्मेति वाहमेतमुपास इति स यो हैतमेवमुपास्तेऽन्न

मस्यात्मा भवति ॥४॥ स होवाच बालाकिर्य एवैष विद्युति पुरुष
मे स्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवाद
यिष्ठाः सत्यस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमु
पास्ते सत्यस्यात्मा भवति ॥५॥ स होवाच बालाकिर्य एवैष स्त
नयित्नौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा
मैतस्मिन्संवादयिष्ठाः शब्दस्यात्मेति वा अहमेतमुपास इति
स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ॥६॥ स होवाच बाला

किर्यएवैषवायौपुरुषस्तमेवाहमुपास इतितंहोवाचाजातश
त्रुमामैतस्मिन्संवदयिष्ठा इंद्रोवैकुंठोऽपराजितासेनेतिवाअह
मेतमुपास इतिसयोहैतमेवमुपास्ते जिष्णुर्हवाअपराजिष्णुर
न्यतस्त्यजायीभवति॥७॥सहोवाचगार्ग्याः किर्यएवैषआकाशे
पुरुषस्तमेवाहमुपास इतितंहोवाचाजातशत्रुर्मामैतस्मिन्सं
वादयिष्ठाः पूर्णमप्रवर्तिब्रह्मेतिवाअहमेतमुपास इतिसयोहै २५
तमेवमुपास्ते पूर्यतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गे

णांलोके नसर्वमायुरेति॥८॥स होवाचबालाकिर्यएवैषोऽग्नौपु
रुषस्तमेवाहमुपास इतितंहोवाचाजातशत्रुर्मामैतस्मिन्सं
वादयिष्ठा विषासहिरितिवा अहमेतमुपास इतिसयएतमे
वमुपास्ते विषासहिर्हवा अन्येषुभवति॥९॥सहोवाचबाला
किर्यएवैषोऽप्सुपुरुषस्तमेवाहमुपास इतितंहोवाचाजा
तशत्रुर्मामैतस्मिन्संवादयिष्ठास्तेजस्स्वात्मेतिवा अहमे
तमुपास इतिसयएतमेवमुपास्ते तेजस्स्वात्मा भवति त्यपि

स

दैवतमथाध्यात्मं॥१०॥सहोवाचबालाकिर्यएवैषआदर्शेपु
रुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्सं
वादयिष्ठाःप्रतिरूपइतिवाअहमेतमुपासइतिसयोहैतमेव
मुपास्तेप्रतिरूपोहैवास्यप्रजायामाजायतेनाप्रतिरूपः॥११॥
सहोवाचबालाकिर्यएवैषछायायांपुरुषस्तमेवाहमुपासइ
तितंहोवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठाद्वितीयोऽनपग २५
इतिवाअहमेतमुपासइतिसयोहैतमेवमुपास्तेविंदतेद्वि

तीयांधितीयवान्नतिन्नवति॥१२॥सहोवाचबालाकिर्यएवैष
प्रतिश्रुत्कायांपुरुषस्तमेवाहमुपासइतितंहोवाचाजातश
त्रुर्मामैतस्मिन्संवादयिष्ठाअसुरितिवाअहमेतमुपासइतिस
योहैतमेवमुपास्तेनपुराकालात्संमोहमेति॥१३॥सहोवाच
बालाकिर्यएवैषछायायांपुरुषस्तमेवाहमुपासइतितंहोवाचा
जातशत्रुर्मामैतस्मिन्संवादयिष्ठामृत्युरितिवाअहमेतमु
पासइतिसयोहैतमेवमुपास्तेनपुराकालात्प्रैतीति॥१४॥

स होवाच बालाकिर्यो नितत्नु रूपः स्तुत्न स्वप्नया चरति तमेवा
हमुपास इति तं होवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठायमो
राजेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते सर्वं हास्मा
इदं श्रैष्ठ्याय यमयते ॥१५॥ स होवाच बालाकिर्य एवैष शारीरे पु
रुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मामैतस्मिन्संवद
यिष्ठाः प्रजापतिरिति वा अहमेतमु…स इति स यो हैतमेवमुपा
स्ते प्रजायते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोके

न सर्वमायुरेति॥६॥ सहोवाच बालाकिर्य एवैष दक्षिणे दिशि
पुरुष एतमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्सं
वादयिष्ठा वायमात्माग्नेरात्मा ज्योतिष्मानात्मेति वाऽहमे
तमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति
॥७॥ सहोवाच बालाकिर्य एवैष सव्येऽक्षिणि पुरुष एतमेवाह
मुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः सत्य
स्यात्मा विद्युतस्यात्मा तेजस आत्मा [illegible] वाऽहमेतमुपास इति

सयोहैतमेवमुपास्तएतेषांसर्वेषामात्माभवति॥१॥ततउहबा
लाकिस्तूष्णीमासतंहोवाचाजातशत्रुरेतावन्नुबालाकाइ
इत्येतावदितिहोवाचबालाकिस्तंहोवाचाजातशत्रुर्मृषा
वैखलुमासंवादयिष्ठाब्रह्मतेब्रवाणीतियोवैबालाकएतेषां
पुरुषाणांकर्त्तायस्यवैतत्कर्मसवैवेदितव्यइतिततउहबाला
किःसमित्पाणिःप्रतिचक्रमउपायानीतितंहोवाचाजात २८
शत्रुःप्रतिलोमरूपमेतन्मन्येयत्क्षत्रियोब्राह्मणमुपनयेतै

हि त्वा ज्ञपयिष्यामीति तं ह पाणावभिपद्य प्रवव्राज तौ ह सु
प्तं पुरुषमाजग्मतुस्तं हाजातशत्रुरामंत्रयांचक्रे बृहन्पांडरवा
सः सोमराजन्निति स उ ह शिश्य एव तत उ हैनं यष्ट्या विचिक्षेप स
तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरु
षोऽशयिष्ट क्वैतदभूत्कुत एतदागादिति तत उ ह बालाकिर्न
विजज्ञे तं होवाचाजातशत्रुर्यत्रैष एतद्बालाके पुरुषोऽशयि
ष्ट यत्रैतदभूद्यत एतदागादिति हिता नाम पुरुषस्य नाड्यो

निषत
अ ७०
शमाकस्य

हृदयात्पुरीततमभिप्रतन्वंतितद्यथासहस्रधाकेशोविपा
टितस्तावदण्व्यःपिंगलस्याणिम्नातिष्ठंतिशुक्लस्यकृष्ण
स्यपीतस्यलोहितस्यतासुतदाभवतियदासुप्तःस्वप्नं
कंचनपश्यति॥१८॥अथास्मिन्प्राणएवैकधाभवतितदेनं
वाक्सर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रोत्रं
सर्वैःशब्दैःसहाप्येतिमनःसर्वैर्ध्यानैःसहाप्येतिसयदाप्र
तिबुध्यतेयथाग्नेर्ज्वलतःसर्वादिशोविस्फुलिंगाविप्रतिष्ठे २८

रन्नेवमेवै तस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो
देवा देवेभ्यो लोकाः स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानम
नुप्रविष्ट आ लोमभ्य आ नखेभ्यस्तद्यथा क्षुरः क्षुरधाने वोपहि
तो विश्वंभरो वा विश्वंभरकुलाय एवमेवैष प्रज्ञात्मेदं शरीरमा
त्मानमनुप्रविष्ट आ लोमभ्य आ नखेभ्यस्तमेतमात्मानमे
त आत्मानोन्ववस्यंते यथा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठी स्वैर्भुंक्ते
यथा वा स्वाः श्रेष्ठिनं भुंजंत्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुं

॰नि॰षत॰
॰अ॰१०२

क्रुएवमेवैतन्मात्मानएतमात्मानंभुंजंती॥ति सयावद्धवाइंद्रए
तमात्मानंनविजज्ञे तावदेनमसुराअभिबभूवुः सयदाविज
ज्ञेथहत्वासुरान्विजित्यसर्वेषांचदेवानांश्रैष्ठ्यंस्वाराज्यमा
धिपत्यंपर्यैति यएवंवेदयएवंवेद॥ तथाएवैवंविद्वान्सर्वान्पा
प्मनोपहत्यसर्वेषांचभूतानांश्रैष्ठ्यंस्वाराज्यमाधिपत्यंपर्ये
ति यएवंवेदयएवंवेद॥२०॥इत्यारण्यकेषष्ठोध्यायःसमाप्तः ३०
॥ॐ॥उँऋतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्तार

मवत्ववतुमामवतुवक्तारमयिन्नर्गोमयिमहोवाङ्मेमनसि
प्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविराविर्मयिएधिवेदस्यम
आणीस्थःश्रुतंमामाप्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यॐइला
नमइलानमऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमोस्तुदेवेभ्यः
शिवानःशंतमाभवसुमृडीकासरस्वतीमातेव्योमसंदृशि
इदंमनइषिरंयचक्षुःसूर्योज्योतिषांश्रेष्ठोदीक्षेमामाहिंसीः॥
॥१॥ अथातःसंहितायाउपनिषत्पृथिवीपूर्वरूपंद्यौरुत्तररूपं

वायुःसंहितेतिशौरवीरोमांडूकेयआकाशःसंहितेत्यस्यमांडूक्या
वेदयांचक्रेसहापिपरिदृष्टोमेनेनमेस्यपुत्रेणसममगादितिपरि
दृष्टोमेनइत्यागस्त्यःसमानंह्येतत्पितुश्चपुत्रस्यचवायुश्चाका
शश्चेत्यधिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपंप्राणःसं
संहितेतिशौरवीरोमांडूकेयोथहस्मास्यपुत्रआहदीर्घमनसा
वाअग्रेकीर्त्तयतितद्वाचावदतितस्मान्मनएवपूर्वरूपंवागुत्त
ररूपंमनोवाक्प्राणस्त्वेवसंहितेतिसएषोश्वरथःप्रष्टिवाह ३१

नोमनोवाक्प्राणाः संहिताः स्वर्गं लोकं गमयन्ति स य एवमेतां संहि
तां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण
लोकेन सर्वमायुरेतीति मांडूकेयानां ॥२॥ शाकल्यस्य पृथि
व्यन्तिः पृथिवी वागनुव्याहाराः स यदि निर्भुजः स्वप्नुवे व
यं मध्यमो वाक्प्राणो न माता जाया प्रज्ञा वा गृह इति वा त्नि
सर्वमुत्तमं ॥३॥ अथातः शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तर
रूपं वायुः संहिता वृष्टिः संधिः पर्जन्यः संधाता तदुतत्ता पिय

त्रैतद्भवत्यनुगृह्णन्महामेघोवृष्टिंवर्षतिद्यावापृथिवीवासं म
ध्यातामित्यधिदैवतमथाध्यात्मंपुरुषोयंसर्वमाण्डइवविद
३ त्रै खेनभवतस्तस्येदमेवपूर्वरूपमिदमुत्तररूपंतत्रायमंतरेणा
काशोयथासौद्यावापृथिव्योरंतरेणाकाशस्तस्मिन्नेतस्मि
न्नाकाशेप्राणआयत्तोभवतियथामुष्मिन्नाकाशेवायुराय 32
त्तोभवतियथामूनित्रीणिज्योतींष्येवमिमानिपुरुषेत्रीणि
ज्योतींषियथासौदिव्यादित्यएवमिदंशिरसियच्चक्षुर्यथा

सावंतरिक्षे विद्युद्देवमित्यात्मानि हृदयं यथायमग्निः पृथि
व्यामेवमिदमुपस्थे रेतएवमिवह सम्भवति आत्मानमनु वि
धायाहेदमेवपूर्वरूपमिदमुत्तररूपं मनोवाक्प्राणस्त्वेव संहि
४२ तेति सएषोग्रंथः अपिवाहनो नाम मनोवाक्प्राणैः संहितः स्वर्ग्यं
लोकं गमयति सयएवमेतां संहितां वेदसंधीयते प्रजया पशु
भिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथापृ
थिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहिता दिशः संधिरादि

ति२

त्यः संधातेति। वेश्वामित्र इत्यधिदैवतमथाध्यात्मं वाक् पूर्वरूपं म
न उत्तररूपं प्राणः संहिता श्रोत्रं संधिरिश्च हुः संधातासयएवमेतां
संहितां वेद संधीयते प्रजयापशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण
लोकेन सर्वमायुरेति॥ ४॥ अग्निः पूर्वरूपमर्यं इमा उत्तररूपं विद्युत् सं
हितेति सूर्यदत्त इत्यधिभूतं दैवतमथाध्यात्मं वाक् पूर्वरूपं मन
उत्तररूपं सत्यं संहितासयएवमेतां संहितां वेद संधीयते प्रजः
प्रजयापशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति 33
५॥

पृथिवीपूर्वरूपं द्यौरुत्तररूपं कालः संहितेतिराधेयइत्यधिदैवत
मथाध्यात्मंवाक्पूर्वरूपं मनउत्तररूपंमात्मासंहितासयएवमेतां
संहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेण
लोकेनसर्वमायुरेति॥७॥वाक्पूर्वरूपं मनउत्तररूपंविद्यासंहि
तेतिपौष्करसादिःसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशु
निर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति॥८॥अथा
तानुव्याहाराःप्राणोवंशइतिविद्यात्सयएनंप्राणंवंशंब्रुव

श्री रामः

पाठ: न्यस्मुपवदेत्कुर्वन्कश्चिद्यन्नन्वेत प्राणं वंशं समधाः प्राणं वंशं
संधित्सितुं नयात्कोपीद्याच्च प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयाद
थ यदेश कुर्वन्नन्वेत प्राणं वंशं समधित्सीस्तेनात्याकः संधातुं प्राण
स्त्वा वंशो हास्यतीत्येवैनं ब्रूयाद् यथानुकथायत्वेव बाब्रूवन्त्वा
ब्रूयादन्यास्मेवयत्तथास्यान्नत्वेवान्यत्कुशलेना ब्राह्मणं ब्रूया
दति युग्म एव ब्राह्मणं ब्रूयान्नातियुग्मेन यब्राह्मणं ब्रूयान्नमो
स्तु ब्राह्मणेभ्य इति शौरवीरो माण्डूकेयः ॥४॥ स यदि प्राणं वं 38

शंब्रुवंतंपरमुपवदेच्छक्नुवंतंयेन्मन्येतप्राणांवंशंसमधित्सिषंप्रा
णांवंशंसमधित्सिसंनशक्नोषीत्याहप्राणस्त्वावंशोहास्यतीत्ये
नंब्रूयादथयदशक्नुवंतंमन्येतप्राणांवंशंसमधित्सीस्तंनाशक्नो
४धा संधातुंप्राणास्त्वावंशोहास्यतीत्येवैनंब्रूयाद्यथानुकथायब्रुवंतं
वाब्रुवंतंवाब्रूयाद[illegible]ासमेवयंतथास्याद्धच्चेवान्यत्कुर्यात्
ब्राह्मणंब्रूयादितियुक्तएवब्राह्मणंब्रूयान्नातियुक्तेनयब्राह्मणं
ब्रूयान्नमोस्तुब्राह्मणेभ्यइतिज्ञारवीरामांपूकेयः॥१०॥अथात

निर्न्नुजः प्रवादाः पृथिव्यायतनं निर्न्नुजिद्दिवायतनं प्रत्रस्समंतरि
क्षायतनमुभयमंतरेणा स यदि एनं निर्न्नुजं ब्रूवन्त्यरमुपवदेत्पृथिवीं
देवतामारः पृथिवीत्वा देवता रिष्यतीत्येनं ब्रूयाद्यथ यदि प्रतृण्णं
हि ब्रुवन्त्यरमुपवदेद्दिवं देवतामारो द्यौस्त्वा देवता रिष्यतीत्येनं ब्रू
याद्यथ यद्युभयमंतरेणा ब्रुवन्त्यरमुपवदेदंतरिक्षं देवतामारांत
रिक्षं त्वा देवता रिष्यतीत्येनं ब्रूयाद्यथ यदि संधिं विवर्तयति निर्न्नु ३५
जस्य रूपमथ यच्छुद्धेक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्र उ ए

२ मृत्युकाम ३

वाचनयमंतरेणोन्नयं व्याप्नन्नवत्यन्ना यकामो मानिचुजं ब्रूयात्स्वर्गका
मः प्रत्यसमंतरिक्षायतनमुन्नयमंतरेणास्यरन्नानिचुजं ब्रुवन्यन्य
मुपवदेद्द्याष्वाब्रवराच्यास्छानान्यामित्येनं ब्रूयादथयदिप्र
सन्नुवन्यान्यमपवदेद्द्याष्वाउत्तराच्यास्छानाच्यामित्येवैनं ब्रूया
यस्त्वेवो नयमंतरेणाह तस्यनास्त्यपवादोयथानुकथान्न ब्रुव
न्वाब्रुवन्वाब्रूयाद्वन्यासमेवयनथास्यान्नत्वेवान्यत्कुशलाब्रा
मणाब्रुयादतिपुन्नएव ब्रामणो ब्रूयान्नातिपुन्नेनयब्रामण

ब्रूयान्नमोस्तुब्राह्मणेभ्यइतिशौरवीरोमांडूकेयः ॥१॥ अथखल्वा
ऊ निर्भुजवक्त्राः पूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंयएकाव
काशोंतरेणसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्र
जयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥१२॥ गै
36 अथवैवयंब्रूमोनिर्भुजवक्त्राःस्मइतिहस्माहह्रस्वोमांडूकेयः
पूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंतद्यासोमात्रापूर्वरूपात्तररूपसं 35
तरेणयेनसंधिंविवर्तयतियेनमात्रामात्रंविजानातियेनस्वरास्व

आरो मी

रंविज्ञापयति सासंहितेतिस्य एवमेतां संहितां वेद संधीयते प्र
जया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरे
ति ॥१३॥ अथ ह स्मास्य पुत्र आह मध्यमः प्रातियोधीपुत्रो मत्रथवा
सीपूर्वमेवाक्षरं पुर्वरूपमुत्तरमुत्तररूपं तथासौ मात्रा संधिविज्ञाप
नी साम तद्भवति सामेवाहं संहितां मन्य इति तद्वेतदृष्याभ्युदितांपप
नःस्तेन न्योपायज्ञश्चिद्धह स्पदे निरामिणो रिपवोऽन्नेषु जाग्रथुः ॥ इन्द्रा
देवानामोहते विव्रयो हृदि बृहस्पते न परः साम्नो विदुरिति स य

एवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेन
स्वर्गेणलोकेनसर्वमायुरेति॥१४॥वाक्प्राणेनसंधीयतइक्कैं७
स्थ्यःप्राणःपवमानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोके
नस्वर्गोलोकोब्रह्मणासैषावरपरासंहितासयएवमेतामवरप
रांसंहितांवेदएवंहैवसप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गे
णलोकेनसंधीयतेयथैषावरपरासंहितासयदिपरेणावोपस्पृशेः ३९
स्वेनवार्थेनाभिव्याहरेदभिव्याहरन्नेवविद्याद्दिवंसंहितागमदि

उषादेवानन्निद्याहारार्थीमेवंन्नविष्यतीत्यैतेनावरपरेणा तथ्याहैक
ड्रुवति॥१५॥मातापूर्वरूपंपितोत्तररूपंप्रजासंहितेत्तिन्नाग्विस्तंदेत
देकमेवसर्वमित्यनूरूपंमातायद्वेदंपितायप्रजायसर्वासेषादि
तिःसंहितादितियद्वेदंसर्वंयदिदंकिंयिदिश्वनूतंतदेतद्याम्न्युदिती
म्रदितिर्यौर्दितिरंतरिक्षमदितिर्मातासपितासपुत्रः।विश्वेदेवात्र
दितिःपंचजनात्रदितिर्जातमदितिर्जनित्वमित्तिसयएवमेतांसंहि
तांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोको

38

केनसर्वमायुरेति॥१३॥जायापूर्वरूपंपतिरुत्तररूपंपुत्रःसंहितारेतःसंधिः
[illegible]नस्सर्वमायुर्नसंधानमितिहस्थविरःशाकल्यःसेषाप्रजापतिसं
हितासयएवमेतांसंहितांवेदप्रजायतेप्रजयापशुभिर्यशसाब्रह्म
